# आदित्यहृदय स्तोत्रम्

ततो युद्ध परिश्रांतं समरे चिंतया स्थितम् ।
रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम् ।। १
दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम् ।
उपागम्याब्रवीद्रामं अगस्त्यो भगवानृषिः ।। २.
राम राम महाबाहो शृणु गुह्यं सनातनम् ।
येन सर्वानरीन् वत्स समरे विजयिष्यसि ।। ३
आदित्यहृदयं पुण्यं सर्वशत्रु विनाशनम् ।
जयावहं जपेन्नित्यं अक्षयं परमं शिवम् ।। ४.
सर्वमंगळ मांगळ्यं सर्वपाप प्रणाशनम् ।
चिंताशोक प्रशमनं आयुर्वर्धन मुत्तमम् ।। ५.
रश्मिमंतं समुद्यंतं देवासुर नमस्कृतम् ।
पूजयस्व विवस्वंतं भास्करं भुवनेश्वरम् ।। ६.
सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः ।
एष देवासुरगणान् लोकान् पाति गभस्तिभिः ।। ७
एष ब्रह्माच विष्णुश्च शिवस्स्कंदः प्रजापतिः ।
महेंद्रो धनदः कालो यमस्सोमो ह्यपांपतिः ।। ८.
पितरो वसवस्साध्या ह्यश्विनौ मरुतो मनुः ।
वायु र्वह्निः प्रजा प्राणा ऋतुकर्ता प्रभाकरः ।। ९.
आदित्य स्सविता सूर्यः खगः पूषा गभस्तिमान् ।
सुवर्ण सदृशो भानुः स्वर्ण रेता दिवाकरः ।। १०.
हरिदश्वः सहस्रार्चिः सप्तसप्ति र्मरीचिमान् ।
तिमिरोन्मथनश्शंभु स्त्वष्टा मार्तांड अंशुमान् ।। ११.
हिरण्यगर्भ श्शिशिर स्तपनो भास्करो रविः ।
अग्निगर्भोदितेः पुत्त्रः शंखश्शिशिरनाशनः ।। १२.
व्योमनाथस्तमोभेदी ऋग्यजुस्सामपारगः
घनवृष्टिरपां मित्रो विंध्य वीथी प्लवंगमः ।। १३
आतपी मंडली मृत्युः पिंगळः सर्वतापनः ।
कविर्विश्वो महातेजा रक्तस्सर्व भवोद्भवः ।। १४.
नक्षत्र ग्रहताराणां अधिपो विश्वभावनः ।
तेजसामपि तेजस्वी द्वादशात्मन् नमोस्तुते ।। १५.
नमः पूर्वाय गिरये पश्चिमे गिरये नमः ।
ज्योतिर्गणानां पतये दिनाधिपतये नमः ।। १६.

जयाय जयभद्राय हर्यश्वाय नमोनमः ।
नमोनमः सहस्रांशो आदित्याय नमोनमः ।। १७.
नम उग्राय वीराय सारंगाय नमोनमः ।
नमः पद्मप्रभोदाय मार्तांडाय नमोनमः ।। १८.
ब्रह्मेशानाच्युतेशाय सूर्यायादित्यवर्चसे ।
भास्वते सर्वभक्षाय रौद्राय वपुषे नमः ।। १९.
तमोघ्नाय हिमघ्नाय शत्रुघ्नाया मितात्मने ।
कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः ।। २०.
तप्तचामीकराभाय वह्नये विश्वकर्मणे ।
नमस्तमोभिनिघ्नाय रुचये लोकसाक्षिणे ।। २१.
नाशयत्येष वै भूतं तदेव सृजति प्रभुः ।
पायत्येष तपत्येष वर्षत्येष गभस्तिभिः ।। २२.
एषः सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः ।
एष एवाग्निहोत्रं च फलं चैवाग्निहोत्रिणाम् ।। २३.
वेदाश्च क्रतवश्चैव क्रतूनां फलमेवच ।
यानि कृत्यानि लोकेषु सर्व एषः रविः प्रभुः ।। २४.
एनमापत्सु कृच्छ्रेषु कांतारेषु भयेषु च ।
कीर्तियन् पुरुषः कश्चिन्नावसीदति राघव ।। २५.
पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम् ।
एतत्त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि ।। २६.
अस्मिन् क्षणे महाबाहो रावणं त्वं वधिष्यसि ।
एवमुक्त्वा तदागस्त्यो जगाम च यथागतम् ।। २७.
एतच्छ्रुत्वा महातेजा नष्टशोको भवत्तदा ।
धारयामास सुप्रीतो राघवः प्रयतात्मवान् ।। २८.
आदित्यं प्रेक्ष्य जप्त्वातु परं हर्षमवाप्तवान् ।
त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान् ।। २९.
रावणं प्रेक्ष्य हृष्टात्मा युद्धाय समुपागमत् ।
सर्वयत्नेन महता वधेतस्य धृतोभवत् ।। ३०.
अथ रविरवदन्निरीक्ष्य रामम् मुदितमनाः परमं प्रहृष्यमाणः
निशिचरपति संक्षयं विदित्वा सुरगण मध्यगतो वचस्त्वरेति ।।३१